Saarth E-Journal

Saarth E-Journal of Research

E-mail : sarthejournal@gmail.com

www.sarthejournal.com

ISSN NO : 2395-339X
Peer Reviewed
Vol.8 No.14

Impact Factor
Quarterly
Apr-May-june2023

# वेदाङ्गपरिचयः

BHARATBHAI BHIKHAJI RAJGOR.

**वेदाङ्गानि कति?**

**"शिक्षा कल्पो व्याकरणं निरूक्तं छन्दसां च यः।**
**ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु।।"**

एतेषां षण्णां महत्त्वं ज्ञापितुं पाणिनिः पाणिनीयशिक्षायां लिखति

**"छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ कथ्यते।**
**ज्योतिषामयनं चक्षुर्निरूक्तं श्रोत्रमुच्यते।।**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।"**

- **शिक्षा**

शिक्षाग्रन्थाः वर्णोच्चारणविधिं वर्णयन्ति। वर्णाः कथम् उच्चारणीयाः? तेषां किं स्थानम्? कश्च तत्र यत्नः? कण्ठादिषु उच्चारणेन कः लाभः? कति वर्णाः? कतिस्वराः? कति उच्चारणस्थानानि? टे कथम् प्रयोज्याः इत्यादयः विषयाः शिक्षाग्रन्थेषु वर्णिताः सन्ति। सायणेन ऋग्वेदभाष्यभूमिकायां शिक्षालक्षणम् उच्यते यत् ---

**"स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते सा शिक्षा।"**

साम्प्रतम् उपलब्धेषु शिक्षाग्रन्थेषु पाणिनीयशिक्षा प्रमुखा अस्ति। अन्येऽपि विशिष्टाः शिक्षाग्रन्थाः सन्ति --- 'याज्ञवल्क्यशिक्षा, व्यासशिक्षा, नारदशिक्षा, माण्डूकीशिक्षा इत्यादयः। 'शिक्षा घ्राणं तु वेदस्य' इति कथनेन शिक्षाग्रन्थानां नासिकारूपं स्थानं संस्कृतसाहित्ये।

- **छन्दः**

वेदेषु मन्त्राः प्रायःछन्दोबद्धाः एव सन्ति। वृत्तज्ञानाय छन्दशास्त्रस्य ज्ञानमावश्यकम्। छन्दशास्त्रविषयकः मुख्यः ग्रन्थः पिङ्गलप्रणीतं छन्दसूत्रमेवोपलभ्यते। प्रातिशाख्यग्रन्थेषु अपि वृत्तविचारः प्राप्यते। अस्मात् एव लौकिकछन्दशास्त्रस्य विकासः जातः एवं मन्यते। छन्दशास्त्रं वेदपुरूषस्य पादभूतं मन्यते।

- **व्याकरणम्**

व्याकरणे प्रकृति-प्रत्ययस्य विचारः, उदात्तादिस्वरविचारः, उदत्तादिस्वरसंचारनियमाः, संधिनियमाः, शब्दरूप-धातुरूपादि-निर्माणनियमाः, प्रकृतेः प्रत्ययस्य च स्वरूपावधारणं तदर्थनिर्धारणं चेति विविधाः नियमाः समाविश्यन्ते। षडङ्गेषु व्याकरणमेव प्रधानभूतं तस्मादेव एतत्वेदपुरूषस्य मुखरूपमिति मन्यते।

अपरञ्च व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेन व्याकरणमिति व्याकरणशब्दस्य व्युत्पत्तिलभ्यः अर्थः विद्यते। संस्कृतव्याकरणावबोधाय महर्षेः पाणिनेः अष्टाध्यायी प्रधानभूतं स्थानं भजते। पाणिनीयसूत्राणि एव अधीकृत्य महर्षिकात्यायनेन वार्त्तिकानि महर्षिणा पतञ्जलिना च महाभाष्यं विरचितम्। तेन एव व्याकरणशास्त्रं 'त्रिमुनि व्याकरणम्' इति नाम्ना जगति ख्यातम्। संस्कृतव्याकरणे अन्येऽपि केचन ग्रन्थाः स्मर्यन्ते ते यथा-वामन-जयादित्ययोः अष्टाध्याय्याः काशिकावृत्तिः, हरदत्तमिश्रकृता पदमञ्जरी, भट्टोजिदीक्षितकृता वैयाकरण सिद्धान्तकौमुदी, शब्दकौस्तुभः, प्रौढमनोरमा, नागेशभट्टकृताः शब्देन्दुशेखर-परिभाषेन्दु शेखर-मञ्जूषास्फ़ोटवादादिग्रन्थाः, वरदराजकृता लघुसिद्धान्तकौमुदी मध्यसिद्धान्तकौमुदी च।

- **निरूक्तम्**

निरूक्ते क्लिष्टवैदिकशब्दानां निर्वचनं प्राप्यते। यास्कप्रणीतं निरूक्तमेव प्रमुखः ग्रन्थः। अत्र मन्त्राणां निर्वचनमूलायाः व्याख्यायाः प्रथमः प्रयासः समासाद्यते। वैदिकशब्दानां संग्रहात्मको ग्रन्थो निघण्टुरिति कथ्यते। तस्यैव व्याख्यानं निरूक्तमेतत्। यास्को निरूक्टे स्वपूर्ववर्तिनः सप्तदशनिरूक्तकारान् परिगणति। निरूक्तं वेदपुरूषस्य कर्णभूतमस्ति। निरूक्ते काण्डत्रयं नैघण्टुकाण्डं नैगमकाण्डं दैवतकाण्डं चेति। निरूक्तस्य पञ्चविधं कार्यम् अधोवत् अस्ति–

**"वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।**
**धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरूक्तम्।।"**

- **ज्योतिषम्**

'ग्रहगणितं ज्योतिषम्' इत्यनुसारं ग्रहाणां गणनं मुख्यस्थानं भजते यत्र तदेव ज्योतिषमस्ति। ज्योतिषे सूर्यादिग्रहाणां नक्षत्राणां च गतिर्निरीक्ष्यते परीक्ष्यते विविच्यते च। ज्योतिषमेव वेदपुरूषस्य नेत्ररूपमस्ति। एकेन श्लोकेन ज्योतिषमहत्त्वम्–

**"वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः।**

**तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद वेदम्।।"**

- **<u>कल्पः</u>**

कल्पसूत्रेषु विविधाध्वराणां संस्कारादीनां च वर्णनं प्राप्यते। मन्त्राणां विविधकर्मसु विनियोगश्च तत्र प्रतिपाद्यते। कल्पसूत्राणि चतुर्धा विभज्यते। श्रौतसूत्रं, गृह्यसूत्रं, धर्मसूत्रं, शुल्बसूत्रं च। कल्पशास्त्रं वेदपुरूषस्य हस्तरूपमस्ति।